# ॥ वाल्मीकि रामायण॥

## ३ अरण्यकाण्ड

## अध्याय ५९

दृष्टाश्रमपदं शून्यं रामो दशरथात्मजः ।
रहितां पर्णशालां च विध्वस्तान्यासनानि च ॥१॥

अदृष्ट्वा तत्र वैदेहीं संनिरीक्ष्य च सर्वशः ।
उवाच रामः प्राक्रुश्य प्रगृह्य रुचिरौ भुजौ ॥२॥

क्व नु लक्ष्मण वैदेही कं वा देशमितो गता ।
केनाहृता वा सौमित्रे भक्षिता केन वा प्रिया ॥३॥

वृक्षेणावार्य यदि मां सीते हसितुमिच्छसि ।
अलं ते हसितेनाद्य मां भजस्व सुदुःखितम् ॥४॥

यैः सह क्रीडसे सीते विश्वस्तैर्मृगपोतकैः ।
एते हीनास्त्वया सौम्ये ध्यायन्त्यस्राविलेक्षणाः ॥५॥

मृतं शोकेन महता सीताहरणजेन माम् ।
परलोके महाराजो नूनं द्रक्ष्यति मे पिता ॥६॥

कथं प्रतिज्ञां संश्रुत्य मया त्वमभियोजितः ।
अपूरयित्वा तं कालं मत्सकाशमिहागतः ॥७॥

कामवृत्तमनार्यं मां मृषावादिनमेव च ।
धिक्त्वामिति परे लोके व्यक्तं वक्ष्यति मे पिता ॥८॥

विवशं शोकसन्तप्तं दीनं भग्नमनोरथम् ।
मामिहोत्सृज्य करुणं कीर्तिर्नरमिवानृजुम् ॥९॥

क्व गच्छसि वरारोहे मामुत्सृज्य सुमध्यमे ।
त्वया विरहितश्चाहं मोक्ष्ये जीवितमात्मनः ॥१०॥

इतीव विलपन्रामः सीतादर्शनलालसः ।
न ददर्श सुदुःखार्तो राघवो जनकात्मजाम् ॥११॥

अनासादयमानं तं सीतां दशरथात्मजम् ।
पङ्कमासाद्य विपुलं सीदन्तमिव कुञ्जरम् ।
लक्ष्मणो राममत्यर्थमुवाच हितकाम्यया ॥१२॥

मा विषादं महाबाहो कुरु यत्नं मया सह ।
इदं च हि वनं शूर बहुकन्दरशोभितम् ॥१३॥

प्रियकाननसञ्चारा वनोन्मत्ता च मैथिली ।
सा वनं वा प्रविष्टा स्यान्नलिनीं वा सुपुष्पिताम् ॥१४॥

सरितं वापि सम्प्राप्ता मीनवञ्जुरसेविताम् ।
वित्रासयितुकामा वा लीना स्यात्कानने क्व चित् ।
जिज्ञासमाना वैदेही त्वां मां च पुरुषर्षभ ॥१५॥

तस्या ह्यन्वेषणे श्रीमन्क्षिप्रमेव यतावहे ।
वनं सर्वं विचिनुवो यत्र सा जनकात्मजा ।
मन्यसे यदि काकुत्स्थ मा स्म शोके मनः कृथाः ॥१६॥

एवमुक्तस्तु सौहार्दाल्लक्ष्मणेन समाहितः ।
सह सौमित्रिणा रामो विचेतुमुपचक्रमे ।
तौ वनानि गिरींश्चैव सरितश्च सरांसि च ॥१७॥

निखिलेन विचिन्वन्तौ सीतां दशरथात्मजौ ।
तस्य शैलस्य सानूनि गुहाश्च शिखराणि च ॥१८॥

निखिलेन विचिन्वन्तौ नैव तामभिजग्मतुः ।
विचित्य सर्वतः शैलं रामो लक्ष्मणमब्रवीत् ॥१९॥

नेह पश्यामि सौमित्रे वैदेहीं पर्वते शुभे ।
ततो दुःखाभिसन्तप्तो लक्ष्मणो वाक्यमब्रवीत् ॥२०॥

विचरन्दण्डकारण्यं भ्रातरं दीप्ततेजसं ।
प्राप्स्यसि त्वं महाप्राज्ञ मैथिलीं जनकात्मजाम् ॥२१॥

यथा विष्णुर्महाबाहुर्बलिं बद्ध्वा महीमिमाम् ।
एवमुक्तस्तु वीरेण लक्ष्मणेन स राघवः ॥२२॥

उवाच दीनया वाचा दुःखाभिहतचेतनः ।
वनं सर्वं सुविचितं पद्मिन्यः फुल्लपङ्कजाः ॥२३॥

गिरिश्चायं महाप्राज्ञ बहुकन्दरनिर्झरः ।
न हि पश्यामि वैदेहीं प्राणेभ्योऽपि गरीयसीम् ॥२४॥

एवं स विलपन्रामः सीताहरणकर्शितः ।

दीनः शोकसमाविष्टो मुहूर्तं विह्वलोऽभवत् ॥ २५ ॥

स विह्वलितसर्वाङ्गो गतबुद्धिर्विचेतनः ।
विषसादातुरो दीनो निःश्वस्याशीतमायतम् ॥ २६ ॥

बहुशः स तु निःश्वस्य रामो राजीवलोचनः ।
हा प्रियेति विचुक्रोश बहुशो बाष्पगद्गदः ॥ २७ ॥

तं सान्त्वयामास ततो लक्ष्मणः प्रियबान्धवः ।
बहुप्रकारं धर्मज्ञः प्रश्रितः प्रश्रिताञ्जलिः ॥ २८ ॥

अनादृत्य तु तद्वाक्यं लक्ष्मणौष्ठपुटच्युतम् ।
अपश्यंस्तां प्रियां सीतां प्राक्रोशत्स पुनः पुनः ॥ २९ ॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com